# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2022-23

## SANACOR11T-SANSKRIT (CC11)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्

क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छं प्रश्नद्वयं समाधेयम्। — 10×2 = 20

(क) अग्निदेवस्य निर्वचनमुल्लिख्य वैशद्येन तत्स्वरूपमालोच्यताम्। — 3+7

(ख) हिरण्यगर्भसूक्तस्य कः ऋषिः ? तत्र वर्णितं दार्शनिकतत्त्वं ग्रन्थोद्धृतिपूर्वकं प्रतिपाद्यताम्। — 1+9

(ग) अथर्ववेदस्य कस्मिन् काण्डे भूमिसूक्तं दृश्यते ? तत्सूक्तस्य काव्यसौन्दर्यं परिवेशचिन्तनं च ऋषिमानसे यथा परिस्फुटं तथा विव्रियताम्। — 1+9

(घ) शिवसंकल्पसूक्तस्य नामकरणे किं बीजम् ? तत्र वर्णितं मनसः स्वरूपं विशदतया पर्यालोच्यताम्। — 2+8

2. अधःप्रदत्तेषु मन्त्रेषु ऋषिच्छन्दोदेवताविनियोगनिर्देशपुरःसरं यथेच्छं मन्त्रद्वयं व्याख्येयम्। — 5×2 = 10

(क) अक्षैर्मा दीव्यः कृषिमित् कृषस्व
वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया
तन्मे वि चष्टे सवितायमर्यः॥

(ख) हिरण्यगर्भः समवर्तताग्रे
भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम॥

(ग) स नः पितेव सूनवेऽग्ने
सूपायनो भव
सचस्वा नः स्वस्तये॥

(घ) यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु॥

3. अधो लिखितेषु मन्त्रेषु यथेच्छमेकस्य मन्त्रस्य पदपाठो विधेयः। 5×1 = 5

(क) राजन्तमध्वराणां
गोपामृतस्य दीदिविम्।
वर्धमानं स्वे दमे॥

(ख) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥

अथवा

अधो लिखितेषु विनियोगवाक्येषु यथेच्छमेकं व्याख्येयम्। 5×1 = 5

(ग) अग्नीषोमप्रणयने उपत्वाग्न इत्यादिकोऽनुवचनीयस्तृचः।

(घ) गतः सूक्तविनियोगः।

ख-विभागः

4. अधः प्रदत्तेषु विषयेषु यथेच्छमेकमाश्रित्य टिप्पणी लिख्यताम्। 5×1 = 5

(क) वैदिकलेट्लकारः।

(ख) वैदिकतुमर्थकप्रत्ययः।

(ग) अवग्रहः।

5. अधो लिखितेषु प्रश्नेषु यथेच्छं पञ्चप्रश्नाः समाधेयाः। 2×5 = 10

(क) गवामित्यस्य वैदिकरूपं किम् ? केन सूत्रेण तत् साध्यते ?

(ख) 'परमे व्योमन्' इत्यत्र 'व्योमन्' इति पदं कथं जायते ?

(ग) 'मादयध्यै' 'पिबध्यै' इति वैदिकपदद्वयस्य लौकिकरूपं लिख्यताम्।

(घ) 'दृशे विख्ये च' इति सूत्रस्य कोऽर्थः ?

(ङ) स्वरितस्वरस्य किं लक्षणम् ?

(च) पदपाठः केन विरचितः ? विकृतिपाठः कतिविधः ?

(छ) वैदिकस्वरः कतिविधः ? के च ते ?

———×———

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2022-23

## SANACOR12T-SANSKRIT (CC12)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागर्या च लेख्यम्

### SECTION-A

1. अधोलिखितानां यथेच्छं पञ्च प्रश्नाः समाधेयाः। $2\times5 = 10$

(क) सूत्रलक्षणप्रतिपादिकां कारिकां लिखत।

(ख) सोदाहरणमुपसर्गसंज्ञाविधायकं सूत्रं निर्दिशत।

(ग) उपधासंज्ञाविधायकं सूत्रं सोदाहरणं लिखत।

(घ) सोदाहरणं गतिसंज्ञाविधायकं सूत्रं लिखत।

(ङ) टिसंज्ञाविधायकं सूत्रमुल्लिख्य तदर्थं संक्षेपतः लिखत।

(च) प्रत्याहारः कः ? ससूत्रं निरूप्यताम्।

(छ) सम्प्रसारणसंज्ञाविधायकं सूत्रमुल्लिख्य तदर्थं संक्षेपतः विवृणुत।

(ज) माहेश्वरसूत्राणि कति सन्ति ? तत्र अच् प्रत्याहारे के वर्णाः गृहीताः ?

### SECTION-B

2. अधोलिखितानां यथेच्छमेकस्य प्रश्नस्य उत्तरं देयम्। $10\times1 = 10$

(क) इन्दो-इउरोपीयभाषायाः कति शाखा विद्यन्ते ? अस्य विभाजनस्य तात्पर्यं व्याख्यायताम्।

(ख) भाषाणां विभागविषये प्रबन्धो विरच्यताम्।

(ग) वैदिक-लौकिकसंस्कृतयोः पार्थक्यमालोच्यताम्।

3. अधोलिखितानां यथेच्छं विषयद्वयमधिकृत्य टीका लेख्या।

(क) सतम्।

(ख) वेरनार-सूत्रम्।

(ग) समाक्षरलोपः।

(घ) अपश्रुतिः।

## SECTION-C

4. अधोलिखितानां यथेच्छमेकस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) समासश्चतुर्विध इति प्रायोवादः– अस्य तात्पर्यं लेख्यम्।

(ख) अव्ययीभावसमासस्य वैशिष्ट्यं विशद्यताम्।

(ग) उपसर्जनं कतिविधं स्वीक्रियते ? तेषां प्रयोगः ससूत्रं सोदाहरणं दर्शयितव्यः।

5. अधोलिखितेषु यथेच्छं सूत्रद्वयस्य व्याख्या कार्या। 5×2 = 10

(क) सह सुपा।

(ख) नदीभिश्च।

(ग) कर्तृकरणे कृता बहुलम्।

(घ) तत्र तेनेदमिति सरूपे।

(ङ) देवताद्वन्द्वे च।

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2022-23

## SANADSE01T-SANSKRIT (DSE1/2)

### VEDA & VYAKARANA

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।

क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः। 2×5 = 10

(क) यजुर्वेदस्य कति विभागाः सन्ति ? रुद्रस्तुतिः कस्मिन् वेदे कस्मिन् अध्याये च वर्तते ?

(ख) रुद्रशब्दस्य किं निर्वचनम् ? कश्च रुद्रशब्दस्य अर्थः ?

(ग) 'अपापकाशिनी' इति पदस्य कोऽर्थः ? पदमिदं कमुद्दिश्य प्रयुक्तम् ?

(घ) 'प्रथमो दैव्यो भिषक्'– इत्यस्य वाक्यस्य कोऽर्थः ? अत्र कस्य उल्लेखः क्रियते ?

(ङ) रुद्रदेवः 'ताम्रः' 'अरुणश्चे'ति कथमुच्यते ?

(च) 'नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे'– इत्यत्र 'नीलग्रीवाय' 'सहस्राक्षाय' चेति पदयोः कः अर्थः ?

(छ) 'यातुधान्योऽधराचीः परासुव'– अस्मिन् मन्त्रे रुद्रं निकषा का प्रार्थना क्रियते ?

ख-विभागः

2. अधोलिखितेषु प्रश्नेषु यथेच्छमेकस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) मनुमत्स्यकथा कुत्र वर्तते ? अस्याः कथायाः वर्णनं कृत्वा वैदिकसाहित्येषु तस्याः गुरुत्वं प्रतिपादयत। 2+8

(ख) 'मत्स्य एव मत्स्यं गिलति'– केन कमुद्दिश्य किमर्थं च उक्तम् ? प्लावनकथामाधारीकृत्य वाक्यस्यास्य तात्पर्यं विवृणुत। 1+1+2+6

ग-विभागः

3. अधः प्रदत्तेषु विषयेषु यथेच्छमेकमाश्रित्य टीकां लिखत। 5×1 = 5

(क) मुरजित्पादनखदीधितिदीपिकाः।

(ख) कविसूक्तिरसायनानि।

(ग) मुक्तिमार्गप्रदर्शिकाः।

अथवा

अधः प्रदत्तेषु श्लोकेषु यथेच्छमेकः श्लोको व्याख्येयः। 5×1 = 5

(क) अग्निं पृणाति पृणति द्विजदेवताश्च
प्रीणाति बान्धवजनानतिथीन् पृणोति।
यः प्रीयते प्रणयिषु प्रयते च भृत्यान्
यं प्राययन्ति कविसूक्तिरसायनानि॥

(ख) यो व्रीणाति जयश्रियं रणमुखे धर्मं वृणीतेऽध्वरे
तेजोभिर्जगदावृणोति वरति ज्ञातीन् यथार्हैर्धनैः।
सत्कीर्तिञ्च वृणाति यो वरयति क्षेमं यशो व्रीयते
युद्धे वारयति द्विषो निवरते नित्यं प्रियोपद्रवम्॥

(ग) यस्य पृथ्वी प्रसूतेऽर्थं धर्ममर्थः प्रसूयते।

घ-विभागः

4. अधो दत्तेषु विषयेषु यथेच्छमेकमाश्रित्य टिप्पनीं लिखत। 5×1 = 5

(क) मातृदेवो भव।

(ख) महः।

(ग) ओमिति ब्रह्म।

अथवा

अधोलिखितेषु उपनिषद्वाक्येषु यथेच्छमेकं व्याख्येयम्। 5×1 = 5

(क) त्वमेव प्रत्यक्षं ब्रह्मासि।

(ख) अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्।

(ग) सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।

ङ-विभागः

5. यथेच्छमेकस्य प्रश्नस्योत्तरं विधेयम्। 10×1 = 10

(क) किं नाम नाभानेदिष्ठम् ? नाभानेदिष्ठोपाख्यानं कस्य ब्राह्मणस्य कस्मिन् अध्याये समुपलभ्यते ? उपाख्यानेऽस्मिन् उपलभ्यमानस्य प्राचीनभारतीयसमाजजीवनस्य आलेख्यम् विरच्यताम्। 1+1+1+7

(ख) "यद्व एतत्सहस्रं सत्रपरिवेषणं तन्मे स्वर्यन्तो दत्तेति"– अत्र वक्ता कः ? कमुद्दिश्य वक्ता एवमुक्तवान् ? उपाख्यानस्य प्रतिपाद्यं तात्पर्यं च समुल्लिख्य समासेन एकः प्रबन्धो विरच्यताम्। 1+1+8

च-विभागः

6. अधः प्रदत्तेषु पदेषु यथेच्छं द्वयोः पदयोः रूपसाधनं कुरुत। 5×2 = 10
कोकिला, गन्त्री, विदुषी, त्रिफली, नारी।

अथवा

यथेच्छं सूत्रद्वयं व्याख्येयम्। 5×2 = 10

(क) अजाद्यतष्टाप्।

(ख) उगितश्च।

(ग) द्विगोः।

(घ) वोतो गुणवचनात्।

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2022-23

## SANADSE02T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

1. अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) सप्तपदार्थीति ग्रन्थः केन विरचितः ? ग्रन्थस्य मङ्गलाचरणे कस्य स्तुतिरस्ति ?

(ख) संयोगसमवाययो भेदद्वयं निर्दिशत।

(ग) अभावः कतिविधः ? नामानि उल्लिखत।

(घ) प्रत्यक्षं कतिविधं स्वीकृतम् ? कानि च तानि ?

(ङ) द्रव्यस्य लक्षणं किम् ?

(च) को नाम शब्दः ?

(छ) का नाम बुद्धिः ?

2. अधोलिखितेषु विषयचतुष्टयमाश्रित्य संस्कृतेन देवनागरीलिप्या च टीकाः लेखनीयाः। 5×4 = 20

(क) सामान्यम्, (ख) तेजः, (ग) परार्थानुमानम्, (घ) मनः, (ङ) कारणम्, (च) समवायः।

3. यथेच्छं द्वयोः प्रश्नयोः संस्कृतेन देवनागरीलिप्या च उत्तरं प्रदेयम्। 10×2 = 20

(क) बृहदारण्यकोपनिषदः नामकरणे किं तात्पर्यमस्ति ? कस्मिन् वेदे अस्याः अन्तर्भावः ?

(ख) 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्'– याज्ञवल्क्येन कथमिदं मीमांसितम् ?

(ग) बृहदारण्यकोपनिषदः पाठ्यांशमवलम्ब्य मैत्रेयीं प्रति याज्ञवल्क्यस्य उपदेशः समासतो निरूप्यताम्।

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2021-22

## SANACOR11T-SANSKRIT (CC11)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्

क-विभागः

1. अधो लिखितेषु प्रश्नेषु यथेच्छं प्रश्नद्वयं समाधेयम्। 10×2 = 20

(क) उषासूक्तस्य ऋषिः कः ? सूक्तमिदम् ऋग्वेदस्य कस्मिन् मण्डले संकलितम् ? सूक्तस्यास्य प्रतिपाद्यम् उषादेवतायाः स्वरूपं यथाधीतं वैशद्येन विव्रियताम्। 1+1+8

(ख) भवतां पाठ्यपुस्तकान्तर्गतम् अक्षसूक्तमवलम्ब्य कितवस्य विलापं समासेन विवृणुत। तत्र उपलभ्यमानस्य समाजजीवनस्य चित्रम् उपस्थाप्यताम्। 6+4

(ग) सांमनस्यसूक्तं कस्मिन् वेदे परिलक्ष्यते ? सूक्तस्यास्य ऋषिछन्दोदैवतानि समुल्लिख्य प्रधानमाहात्म्यं समासेन लिखत। 1+3+6

(घ) कः आसीत् शुनःशेपः ? तत्सम्बन्धिनीम् आख्यायिकां संक्षेपेण वर्णयित्वा अस्याख्यानस्य तात्पर्यं विशदीक्रियताम्। 1+9

2. अधः प्रदत्तेषु मन्त्रेषु ऋषिच्छन्दोदैवतविनियोगनिर्देशपुरःसरं यथेच्छं मन्त्रद्वयं व्याख्येयम्। 5×2 = 10

(क) अग्ने यं यज्ञमध्वरं

विश्वतः परिभूरसि।

स इद्देवेषु गच्छति॥

(ख) यः प्राणतो निमिषतो महि-

त्वैक इद्राजा जगतो बभूव।

य ईशे अस्य द्विपदश्चतुष्पदः

कस्मै देवाय हविषा विधेम॥

(ग) सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।

हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु॥

(घ) यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः।

यस्यां मीयन्ते स्वरवः पृथिव्यामूर्ध्वाः शुक्रा आहुत्याः पुरस्तात्।

सा नो भूमिर्वर्धयद् वर्धमाना॥

3. अधो लिखितेषु मन्त्रेषु यथेच्छम् एकस्य मन्त्रस्य पदपाठः विधेयः। 5×1 = 5

(क) उप त्वाग्ने दिवेदिवे

दोषावस्तर्धिया वयम्।

नमो भरन्त एमसि॥

(ख) यस्येमे हिमवन्तो महित्वा

यस्य समुद्रं रसया सहाहुः।

यस्येमाः प्रदिशो यस्य बाहू

कस्मै देवाय हविषा विधेम॥

अथवा

अधो लिखितेषु विनियोगवाक्येषु यथेच्छमेकं व्याख्येयम्। 5×1 = 5

(ग) अभिप्लवषडहस्य मध्यवर्तिषूक्थ्येषु तृतीय सवने मैत्रावरुणस्य 'अग्ने यं यज्ञम्' इत्यादिको वैकल्पिकोऽनुरूपस्तृचः।

(घ) प्राजापत्यस्य पशोर्वपापुरोडाशहविषां क्रमेणादितस्तिस्रोऽनुवाक्यास्ततस्तिस्रो याज्याः।

ख-विभागः

4. अधः प्रदत्तेषु विषयेषु यथेच्छमेकमाश्रित्य टिप्पणीं लिखत। 5×1 = 5

(क) वैदिकस्वरः।

(ख) वैदिकक्त्वार्थकप्रत्ययः।

(ग) वैदिकशब्दरूपम्।

5. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः।

(क) वैदिकवाङ्मये रात्रिशब्दस्य प्रयोगः कथं भवति ? एकमुदाहरणं दीयताम्।

(ख) ''विप्रासो मतिभिर्जरन्ते'' इत्यत्र विप्रासः इति पदं कथं जायते ? केन च सूत्रेण ?

(ग) 'देवेभिः' 'सचस्वा' चेति द्वयोः वैदिकपदयोः लौकिकं रूपं लिखत।

(घ) वैदिकवाङ्मये प्रयुक्तस्य तुमुन् प्रत्ययस्य उदाहरणद्वयं लिखत।

(ङ) वैदिकवाङ्मये लेट्लकारस्य प्रयोगः कदा भवति ? एकमुदाहरणं दीयताम्।

(च) ''हित्वाय अवद्यं पुनरस्तमेहि'' इत्यत्र हित्वाय इति रूपं कथं जायते ?

(छ) 'श्रियाम्' इति वैदिकपदस्य, 'महिना' इति वैदिकपदस्य च लौकिकं रूपं लिखत।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2021-22

## SANACOR12T-SANSKRIT (CC12)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागर्या च लेख्यम्

### SECTION-A

1. अधोलिखितानां यथेच्छं पञ्च प्रश्नाः समाधेयाः। 2×5 = 10

(क) भाष्यलक्षणप्रतिपादिकां कारिकां लिखत।

(ख) सूत्रमुखेन येषां वर्णानां वृद्धिसंज्ञा भवति तान् लिखत।

(ग) नदीसंज्ञाविधायकं सूत्रमुल्लिख्य तस्य सामान्यम् अर्थं लिखत।

(घ) वार्त्तिकलक्षणमुल्लिख्य वार्त्तिककारस्य नाम निर्दिशत।

(ङ) कर्मप्रवचनीयशब्दस्य अर्थं सोदाहरणं विवृणुत।

(च) गुणसंज्ञाविधायकं सूत्रमुल्लिख्य येषां वर्णानां गुणसंज्ञा भवति तान् निर्दिशत।

(छ) घिसंज्ञाविधायकं सूत्रमुल्लिख्य तदर्थं संक्षेपतः लिखत।

(ज) घुसंज्ञाविधायकं सूत्रमुल्लिख्य तदर्थं संक्षेपतः लिखत।

### SECTION-B

2. अधोलिखितानां यथेच्छमेकतरस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) ग्रीक्-भाषामधिकृत्य निबन्धः कश्चन लिख्यताम्। इन्दो-इउरोपीय-भाषागोष्ठीषु ग्रीक्-भाषायाः गुरुत्वं विचार्यताम्। 7+3

(ख) किं नाम ध्वनिपरिवर्तनसूत्रमुच्यते ? ग्रासमानसूत्रस्वरूपमुल्लिख्य संस्कृतभाषायां तस्य उपयोगिता विस्तरेण लेख्या। 3+3+4

(ग) अपश्रुतिस्वरूपं सोदाहरणं व्याख्यायताम्। 10

3. अधोलिखितानां यथेच्छं विषयद्वयमधिकृत्य टीका लेख्या।

(क) हिट्टाइट्-भाषा।

(ख) ग्रीमसूत्रम्।

(ग) स्वरभक्तिः।

(घ) समीभवनम्।

## SECTION-C

4. अधोलिखितेषु यथेच्छमेकस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) समासे सामर्थ्यतत्त्वमालोच्यताम्।

(ख) बहुव्रीहिसमासस्य लक्षणं भेदाश्च ससूत्रं सोदाहरणं च व्याख्यायन्ताम्।

(ग) समासान्तप्रत्ययविषये संक्षेपेण निबन्धः विरच्यताम्।

5. अधोलिखितेषु यथेच्छं सूत्रद्वयस्य सोदाहरणं व्याख्या कार्या। 5×2 = 10

(क) संख्या वंश्येन।

(ख) तृतीया तत्कृतार्थेन गुणवचनेन।

(ग) कर्तृकर्मणोः कृति।

(घ) विशेषणं विशेष्येण बहुलम्।

(ङ) अजाद्यदन्तम्।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2021-22

## SANADSE01T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्।

### क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः। 2×5 = 10

(क) रुद्रस्य तनुः कीदृशी आसीत् ?

(ख) रुद्रशब्दस्य उत्पत्तिः कस्माद्धातोः भवति ? कश्च रुद्रशब्दस्यार्थः ?

(ग) शुक्लयजुर्वेदस्य सुप्रसिद्धौ द्वौ भाष्यकारौ कौ ?

(घ) शुक्लयजुर्वेदस्य कस्मिन् अध्याये रुद्रस्तुतिः प्राप्यते ? अत्र कति मन्त्राः सन्ति ?

(ङ) 'गिरित्र' इति पदस्य कोऽर्थः ?

(च) रुद्रसूक्ते ऋषिः कं कं च प्रणमति ?

(छ) 'अधिवक्ता' इति कस्य विशेषणम् ? कथं च तत्प्रयुज्यते ?

### ख-विभागः

2. अधोलिखितेषु प्रश्नेषु यथेच्छमेकस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) कस्मिन् ब्राह्मणे मनुमत्स्यकथा लभ्यते ? अत्र प्लावनवर्णनं यथा प्राप्यते तथा समासेन लिखत। 1+1+8

(ख) 'बिभृहि मा पारयिष्यामि त्वेति'– केन उक्तम् ? केन प्रकारेण हि तस्य पोषणं भवति ? येनेदम् उक्तम् सः कं कस्मात् वा पारयिष्यति ? अन्तिमे वक्ता किं करोति ? 1+2+2+5

### ग-विभागः

3. अधः प्रदत्तेषु यथेच्छं विषयमेकमाश्रित्य टीकां लिखत। 5×1 = 5

(क) हव्यकव्यम्

(ख) श्रीर्विषयसुखरसास्वादनाय

(ग) मुरजित्पादनखदीधितिदीपिका।

अथवा

अधः प्रदत्तेषु श्लोकेषु यथेच्छमेकः श्लोको व्याख्येयः।

(क) शास्त्यरीन् धर्ममाशास्ते कीर्तिमाशंसते पराम्।

यः शंसते सतां वृत्तिं विशसत्युत्पथस्थितान्॥

(ख) वेत्ति सर्वाणि शास्त्राणि गर्वो यस्य न विद्यते।

विन्ते धर्मं सदा सद्भिस्तेषां पूजाञ्च विन्दति॥

(ग) लोकेषु शास्त्रेषु च ये प्रसिद्धाः
काव्येषु ये सत्कविभिः प्रयुक्ताः।
उच्चित्य तां श्चित्तविनोदनाय
शब्दानहं धातुभिरुद्धरामि॥

घ-विभागः

4. अधोदत्तेषु विषयेषु यथेच्छमेकमाश्रित्य टिप्पनी लेख्या। 5×1 = 5

(क) स्वरः, (ख) महासंहिता, (ग) पाङ्क्तम्।

अथवा

अधोलिखितेषु उपनिषद्वाक्येषु यथेच्छमेकं व्याख्येयम्। 5×1 = 5

(क) माहाचमस्यः प्रवेदयते।

(ख) ओमिति ब्रह्म। ओमितीदं सर्वम्।

(ग) सह नौ यशः। सह नौ ब्रह्मवर्चसम्।

ङ-विभागः

5. यथेच्छमेकस्य प्रश्नस्योत्तरं विधेयम्। 10×1 = 10

(क) किं नाम ब्राह्मणम् ? ऋग्वेदस्य कतिविधः ब्राह्मणग्रन्थः ? नाभानेदिष्ठाख्यानं कस्मिन् ब्राह्मणग्रन्थे लभ्यते ? अस्मिन् आख्याने लब्धां कथां समासेन प्रतिपादयत। 2+1+1+6

(ख) 'किं कामी वदसि' ?– इत्यत्र कः प्रश्नकर्ता ? स कं पृच्छति ? किमासीत् तस्य उत्तरम् ? अन्तिमे तस्य कीदृशी प्राप्तिः भवति ? 1+1+2+6

च-विभागः

6. अधः प्रदत्तेषु पदेषु यथेच्छं द्वयोः पदयोः रूपसाधनं कुंरुत। 5×2 = 10

अजा, सूर्या, कुमारी, साधिका, नर्तकी, कर्त्री।

अथवा

यथेच्छं <u>सूत्रद्वयं</u> व्याख्येयम्।

(क) ऋन्नेभ्यो ङीप्

(ख) पादोऽन्यतरस्याम्

(ग) वयसि प्रथमे

(घ) अजाद्यतष्टाप्

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2021-22

## SANADSE02T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

1. अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) शिवादित्यः क आसीत् ? मितभाषिणी वा का ?

(ख) पदार्थानां लक्षणं किम् ?

(ग) कर्मणः कति भेदाः ? कानि च तानि ?

(घ) विशेषः कतिविधः ?

(ङ) गन्धस्य भेदानां नामोल्लेखः करणीयः ?

(च) किं नाम शरीरमिति ?

(छ) आत्मा कतिविधः ? के च ते ?

2. अधोलिखितेषु विषयचतुष्टयमाश्रित्य संस्कृतेन देवनागरीलिप्या च टीकाः लेखनीयाः। 5×4 = 20

(क) पृथिवी, (ख) समवायः, (ग) कालः, (घ) व्याप्तिः, (ङ) आत्मा, (च) संस्कारः।

3. यथेच्छं द्वयोः प्रश्नयोः संस्कृतेन देवनागरीलिप्या च उत्तरं लेख्यम्। 10×2 = 20

(क) 'येनाहं नामृता स्याम्, किमहं तेन कुर्याम्'– कया कमुद्दिश्य इदमुक्तम् ? उक्तेरस्याः तात्पर्यनिरूपणं कुरुत।

(ख) उपतिष-च्छब्दस्य व्युत्पत्तिं निरूप्य मुलतत्त्वानि संक्षेपेण प्रतिपाद्यत।

(ग) बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणानुसारं जीवात्मनः उत्क्रमणं प्रतिपादयत।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2021-22

## SANADSE03T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

1. सरलसुरगिरा देवनागरीलिप्या च यथेच्छं द्वयस्य उत्तरं लेख्यम्। 10×2 = 20

(क) 'वाक्यं रसात्मकं काव्यमि'ति विश्वनाथकृतं काव्यलक्षणं प्रतिपदव्यावृत्तिपुरःसरम् आलोच्यताम्।

(ख) 'कीटानुविद्धरत्नादिसाधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः'॥ इति प्रकरणमुल्लिख्य सविस्तारं व्याख्यायताम् अयं श्लोकः।

(ग) रसस्य स्वप्रकाशकत्वं व्याख्याय विशदतया तस्यालौकिकत्वं प्रतिष्ठाप्यताम्।

(घ) विश्वनाथमते लक्षणाभेदाः उदाहरणपुरःसरम् आलोच्यन्ताम्।

2. अधोलिखितेषु यथेच्छम् श्लोकचतुष्टयस्य सरलसुरगिरा व्याख्या कार्य्या। 5×4 = 20

(क) विलोकनेनैव तवामुना मुने कृतःकृतार्थोऽस्मि निबर्हितांहसा।
तथापि शुश्रूषुरहं गरीयसी-र्गिरोऽथवा श्रेयसि केन तृप्यते॥

(ख) चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः॥

(ग) स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः।
विदिद्युते बाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां निधिः॥

(घ) विधाय तस्यापचितिं प्रसेदुषः प्रकाममप्रीयत यज्वनां प्रियः।
ग्रहीतुमार्यान्परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः॥

(ङ) गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।
पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः॥

(च) तमर्घ्यमर्घ्यादिकयाऽऽदिपुरुषः सपर्यया साधु स पर्यपूपुजत्।
गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः॥

अथवा

अधोलिखितेषु यथेच्छं विषयचतुष्टयम् अवलम्ब्य टीका लेख्या।

शिशुपालवधस्य उत्सः, शिशुपालः, माघः, नारदस्य वपुः, अच्युतः, अनुरुसारथिः।

3. अधोलिखितेषु यथेच्छम् पञ्चानाम् प्रश्नानाम् उत्तरं लेख्यम्। 2×5 = 10

(क) युगजीवनमिति रूपकस्य रचयित्री का ? कश्च रूपकस्यास्य प्रकाशकालः ?

(ख) अस्मिन् रूपके कस्य माहात्म्यं प्रतिभासितम् ? रूपके कस्य आस्तिकदर्शनस्य तत्त्वं प्रतिपादितम् ?

(ग) रूपकस्यास्य अध्यायविभाजनं लेख्यम्।

(घ) 'मुद्रा मृत्तिका, मृत्तिका मुद्रा ' इत्युक्तिः कस्य ? प्रसङ्गश्च कः ?

(ङ) मथुरानाथः कः ?

(च) सारदादेव्याः पितरौ कौ आस्ताम् ?

(छ) भवतारिण्याः मन्दिरं कुत्र विराजते ? अस्य मन्दिरस्य प्रतिष्ठा केन कृता ?

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2020, held in 2021

## SANACOR11T-Sanskrit (CC11)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्

क-विभागः

1. अधो लिखितेषु प्रश्नेषु यथेच्छं <u>प्रश्नद्वयं</u> समाधेयम्। 10×2 = 20

(क) अग्निसूक्तस्य ऋषिच्छन्दोदैवतानि समुल्लिख्य अग्निदेवतायाः स्वरूपं यथाधीतं लिखत। 1+1+1+7

(ख) हिरण्यगर्भसूक्तस्य क ऋषिः ? का च देवता ? सूक्तस्यास्य प्रतिपाद्यं तत्त्वं समासेन विवृणुत। 1+1+8

(ग) भूमिसूक्तं कस्मिन् वेदे वर्तते ? अस्य सूक्तस्य क ऋषिः ? सूक्तेऽस्मिन् प्रतिपादितं भूमिमाहात्म्यं समासेन लिखत। 1+1+8

(घ) शिवसङ्कल्पसूक्तस्य क ऋषिः ? का च देवता ? सूक्तेऽस्मिन् मनसः स्तुतिः यथा विहिता तथा उपस्थाप्यताम्। 1+1+8

2. अधः प्रदत्तेषु मन्त्रेषु ऋषिच्छन्दोदैवतविनियोगनिर्देशपुरःसरं यथेच्छं <u>मन्त्रद्वयं</u> व्याख्येयम्। 5×2 = 10

(क) अ॒ग्नि पूर्वे॑भि॒र्ऋषि॑भि॒-

रीड्यो॒ नूत॑नैरु॒त।

स दे॒वाँ एह व॑क्षति॥

(ख) यस्ये॒मे हि॒मव॑न्तो महि॒त्वा

यस्य॑ समु॒द्रं र॒सया॑ स॒हाहुः।

यस्ये॒माः प्र॒दिशो॒ यस्य॑ बा॒हू

कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

(ग) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।

सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥

(घ) यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।

दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु॥

3. अधो लिखितेषु मन्त्रेषु यथेच्छम् एकस्य मन्त्रस्य पदपाठः विधेयः। 5×1 = 5

(क) अग्निमीले पुरोहितं

यज्ञस्य देवमृत्विजम्।

होतारं रत्नधातमम्॥

(ख) हिरण्यगर्भः समवर्तताग्रे

भूतस्य जातः पतिरेक आसीत्।

स दाधार पृथिवीं द्यामुतेमां

कस्मै देवाय हविषा विधेम॥

अथवा

अधो लिखितेषु विनियोगवाक्येषु यथेच्छमेकं व्याख्येयम्। 5×1 = 5

(ग) 'अग्निमीले' इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम्।

(घ) अग्नीषोमप्रणयन 'उप त्वाग्ने' इत्यादिकोऽनुवचनीयस्तृचः।

ख-विभागः

4. अधः प्रदत्तेषु विषयेषु यथेच्छमेकमाश्रित्य टिप्पनीं लिखत। 5×1 = 5

(क) लेट्लकारः।

(ख) वैदिकतुमुन्प्रत्ययः।

(ग) पदपाठः।

5. अधो लिखितेषु प्रश्नेषु यथेच्छं <u>पञ्च</u> प्रश्नाः समाधेयाः।

(क) वैदिकस्वरः कतिविधः ? के च ते ?

(ख) पदपाठः केन विरचितः ? विकृतिपाठः कतिविधः ?

(ग) पदपाठे इति-प्रयोगस्य सोदाहरणमेकं नियमं लिखत।

(घ) 'स जनास इन्द्रः'– इत्यत्र 'जनासः' इति पदं कथं जायते ? किं च सूत्रम् ?

(ङ) 'विश्वा च्यवना कृतानि'- इत्यत्र 'विश्वा', 'च्यवना' चेति द्वयोः वैदिकपदयोः लौकिकं रूपं लिखत।

(च) वैदिकवाङ्मये प्रयुक्तस्य लेट्लकारस्य उदाहरणद्वयं लिखत।

(छ) 'गमध्यै', 'दृष्ट्वाय' चेति द्वयोः वैदिकपदयोः लौकिकं रूपं लिखत।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2020, held in 2021

## SANACOR12T-SANSKRIT (CC12)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागर्या च लेख्यम्

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः समाधेयाः। 2×5 = 10

(क) सूत्रस्य किं लक्षणम् ?

(ख) टिसंज्ञाविधायकं सूत्रं किम् ? कस्तस्यार्थः ?

(ग) कथं केन सूत्रेण उपधासंज्ञा भवति ?

(घ) उपसर्गाः कति सन्ति ? के च ते ?

(ङ) केषां गुणसंज्ञा भवति इति ससूत्रं लिख्यताम्।

(च) किं नाम सम्प्रसारणम् ? ससूत्रं लिख्यताम्।

(छ) प्रत्याहारः कः ? ससूत्रं लिख्यताम्।

### SECTION-B

2. अधोलिखितेषु यथेच्छमेकस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) लौकिक-वैदिकसंस्कृतयोः के भेदाः प्रमुखाः सन्ति इति विचार्यताम्।

(ख) ध्वनिपरिवर्तनस्य के नियमाः सन्ति ? उल्लेखपूर्वकं पर्यालोच्यताम्।

(ग) इन्दो-युरोपीय-भाषापरिवारस्य कति भेदाः स्वीक्रियन्ते ? तेषामुल्लेखपूर्वकं सविस्तरमालोच्यताम्।

### SECTION-C

3. अधोलिखितेषु विषयेषु यथेच्छं द्वयं स्वीकृत्य टीका लेख्या। 5×2 = 10

(क) भाषाविज्ञानम्

(ख) सतम्

(ग) आवेस्ता-वेदयोः ध्वनितात्त्विकं सादृश्यम्।

(घ) नव्यभारतीया आर्यभाषा।

## SECTION-D

4. अधोलिखितेषु यथेच्छमेकस्य प्रश्नस्य उत्तरं देयम्।

(क) चार्थे द्वन्द्व इति सूत्रे च-कारस्य कति अर्थाः भवन्ति ? के च ते ? सोदाहरणं तेषां स्वरूपं पर्यालोच्य सर्वत्र समासो भवति न वा इति विचार्यताम्।

(ख) समासविषये उपसर्जनं किमिति सविस्तरमालोच्यताम्।

(ग) ..........समासः षड्विधो बुधैः॥ इत्यस्य सम्पूर्णं पादपूरणं कृत्वा सविस्तरं समासभेदा आलोच्यन्ताम्।

## SECTION-E

4. अधोलिखितेषु सूत्रद्वयस्य सोदाहरणं व्याख्या कार्या। 5×2 = 10

(क) कर्तृकरणे कृता बहुलम्

(ख) अनेकमन्यपदार्थे

(ग) समर्थः पदविधिः

(घ) सहसुपा।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2020, held in 2021

## SANADSE01T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।

### क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः। 2×5 = 10

(क) रुद्रस्तुतिः कस्मिन् वेदे कस्मिन् अध्याये च वर्तते?

(ख) रुद्रशब्दस्य किं निर्वचनम् ? कश्च रुद्रशब्दस्य अर्थः?

(ग) 'गिरिशन्त' इति पदस्य कोऽर्थः ?

(घ) 'यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत्'– इत्यत्र किमर्थं कस्य स्तुतिः क्रियते ?

(ङ) रुद्रदेवः 'ताम्रः' 'अरुणश्चे'ति कथमुच्यते ?

(च) 'नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे'– इत्यत्र 'नीलग्रीवाय' 'सहस्राक्षाय' चेति पदयोः कः अर्थः ?

(छ) रुद्रः कथं 'कपर्दी' इत्युच्यते ? तस्य आयुधद्वयं किम् ?

### ख-विभागः

2. अधोलिखितेषु प्रश्नेषु यथेच्छमेकस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) मनुमत्स्यकथा कुत्र वर्तते ? अस्याः कथायाः वर्णनं कृत्वा वैदिकसाहित्येषु तस्याः गुरुत्वं प्रतिपादयत। 2+8

(ख) 'मत्स्य एव मत्स्यं गिलति'– केन कमुद्दिश्य किमर्थं च उक्तम् ? मनुमत्स्यकथामाधारीकृत्य प्लावनस्य वर्णनं कुरुत। 1+1+2+6

### ग-विभागः

3. अध उद्धृतेषु यथेच्छं विषयमेकमाश्रित्य टीकां लिखत। 5×1 = 5

(क) मोहान्धकारविध्वंसात्।

(ख) कविसूक्तिरसायनानि।

(ग) उत्पथस्थितान्।

अथवा

अधः प्रदत्तेषु श्लोकेषु <u>यथेच्छमेकः</u> श्लोको व्याख्येयः।

(क) गोपायति क्षितिमिमां चतुरब्धिसीमां

पापाज्जुगुप्सत उदारमतिः सदैव।

वित्तं न गोपयति यस्तु वलीयकेभ्यो-

धीरो न गुप्यति महत्यपि कार्यजाते॥

(ख) यो व्रीणाति जयश्रियं रणमुखे धर्मं वृणीतेऽध्वरे

तेजोभिर्जगदावृणोति वरति ज्ञातीन् यथार्हैर्धनैः।

सत्कीर्तिश्च वृणाति यो वरयति क्षेमं यशो व्रीयते

युद्धे वारयति द्विषो निवरते नित्यं प्रियोपद्रवम्॥

(ग) वृणते न परद्रव्यं गृह्णाति विदुषां गुणान्।

गर्हते हृदयं स्त्रीणां द्विषां गृहयते शिरः॥

घ-विभागः

4. अधो दत्तेषु विषयेषु <u>यथेच्छमेकमाश्रित्य</u> टिप्पनीं लिखत। 5×1 = 5

(क) भूर्भुवः सुवः।

(ख) शीक्षा।

(ग) ओम्।

अथवा

अधोलिखितेषु उपनिषद्वाक्येषु <u>यथेच्छमेकं</u> व्याख्येयम्। 5×1 = 5

(क) शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा वलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः।

(ख) ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय।

(ग) सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।

ङ-विभागः

5. <u>यथेच्छमेकस्य</u> प्रश्नस्योत्तरं विधेयम्। 10×1 = 10

(क) क आसीत् नाभानेदिष्ठः ? तत्सम्बन्धिनीम् आख्यायिकां समासेन वर्णयित्वा तत्कालीनसमाजचित्रम् उपस्थाप्यताम्। 1+9

(ख) नाभानेदिष्ठाख्यानं कस्मात् ग्रन्थात् संगृहीतम्। समासेन ग्रन्थस्यास्य विषयप्रतिपादनं कुरुत। 1+9

च-विभागः

6. अधः प्रदत्तेषु पदेषु यथेच्छं द्वयोः पदयोः रूपसाधनं कुरुत।

एडका, दात्री, विदुषी, गार्गी, इन्द्राणी।

अथवा

यथेच्छं सूत्रद्वयं व्याख्येयम्। 5×2 = 10

(क) अजाद्यतष्टाप्

(ख) उगितश्च

(ग) टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः।

(घ) षिद्गौरादिभ्यश्च।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2020, held in 2021

## SANADSE02T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

1. अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः। 2×5 = 10

(क) सप्तपदार्थीति ग्रन्थस्य मङ्गलाचरणश्लोको लिख्यताम् ?

(ख) सप्तपदार्थीति ग्रन्थस्य रचयिता कः ? अयं ग्रन्थः कां दर्शनपरम्पराम् अन्तर्याति ?

(ग) कति पदार्थाः सप्तपदार्थीकारेण स्वीकृताः ? के च ते ?

(घ) कति द्रव्याणि सप्तपदार्थीति ग्रन्थे स्वीकृतानि ? कानि च तारनि द्रव्याणि ?

(ङ) सामान्यस्य कति भेदाः सप्तपदार्थ्यनुसारं सन्ति ? तेषां भेदानां नामोल्लेखः करणीयः ?

(च) सुखलक्षणं सप्तपदार्थ्यनुसारं लेख्यम् ?

(छ) किं नाम गमनमिति सप्तपदार्थीमनुसृत्य लिख्यताम् ?

2. अधोलिखितेषु विषयचतुष्टयमाश्रित्य संस्कृतेन देवनागर्या च टीकाः लेखनीयाः। 5×4 = 20

(क) विशेषः।

(ख) अभावः।

(ग) बुद्धिः।

(घ) अनुमितिः।

(ङ) वायुः।

(च) आकाशः।

3. यथेच्छं द्वयोः प्रश्नयोः संस्कृतेन देवनागर्या उत्तरं लेख्यम्। 10×2 = 20

(क) बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणानुसारमात्मनः स्वरूपं वर्ण्यताम्।

(ख) उपनिषदिति शब्दस्य व्युत्पत्तिः लेखनीया। बृहदारण्यकोपनिषत् कस्य वेदस्य कस्याः शाखाया अन्तर्गता ? अस्या उपनिषदः चतुर्थाध्यायस्य पञ्चमब्राह्मणानुसारं कर्मसन्न्यासस्य स्वरूपं प्रतिपाद्यताम्।

(ग) बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणानुसारमात्मनः उत्क्रान्तिः वर्णनीया।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2020, held in 2021

## SANADSE03T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

1. सरलसुरगिरा देवनागरीलिप्या च यथेच्छं द्वयस्योत्तरं लेख्यम्। 10×2 = 20

(क) शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी।
अपहृत्य तमः सन्ततमर्थानखिलान्प्रकाशयतु॥– इति मङ्गलाचरणश्लोकः व्याख्येयः।

(ख) साहित्यदर्पणे प्रतिपादितं काव्यप्रयोजनं सविशदमालोच्यताम्।

(ग) रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता– इत्यस्य व्याख्यानं कार्यम्।

(घ) रसस्वरूपं समासत आलोचनीयम्।

2. अधोलिखितेषु यथेच्छं श्लोकचतुष्टयस्य सरलसुरगिरा व्याख्या कार्या। 5×4 = 20

(क) नवानधोऽधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना॥

(ख) सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लम्भयन्।
द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः॥

(ग) दधानमम्भोरुहकेशरद्युतीर्जटाः शरच्चन्द्रमरीचिरोचिषम्।
विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं व्रततीततीरिव॥

(घ) हरत्यघं संप्रति हेतुरैष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्॥

(ङ) चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः॥

(च) विलोकनेनैव तवामुना मुने कृतः कृतार्थोऽस्मि निबर्हितांहसा।
तथापि शुश्रूषुरहं गरीयसीर्गिरोऽथवा श्रेयसि केन तृप्यते॥

अथवा

अधोलिखितेषु यथेच्छं विषयचतुष्टयमवलम्ब्य टीका लेखनीया। 5×4 = 20

शिशुपालवधम्, माघः, नारदः, हरिः, कार्तस्वरः, कालत्रितयम्।

3. अधोलिखितेषु यथेच्छं पञ्चानां प्रश्नानाम् उत्तरं लेख्यम्।

(क) कमुद्दिश्य 'युगजीवनम्' इति नाटकं रचितम् ?

(ख) नाटकस्यास्य रचयित्री का ? तया रचितमपरं रचनाद्वयं किम् ?

(ग) श्रीरामकृष्णदेवस्य पत्न्याः परिचयो वर्णनीयः।

(घ) कः खलु हृदयः ?

(ङ) क आसीत् तोतापुरी ?

(च) मथुरानाथस्य परिचयो वर्ण्यताम्।

(छ) का आसीत् भैरवी ब्राह्मणी ?

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2022-23

## SANADSE03T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

1. सरलसुरगिरा देवनागरीलिप्या च यथेच्छं प्रश्नद्वयस्य उत्तरं लेख्यम्। 10×2 = 20

(क) विश्वनाथाचार्येण प्रतिपादितं काव्यप्रयोजनं सविस्तरम् वर्ण्यताम्।

(ख) साहित्यदर्पणमनुसृत्य विभावलक्षणं तस्य मुख्यभेदद्वयं च आलोच्येताम्।

(ग) साहित्यदर्पणमवलम्ब्य संक्षेपेण नायिकाभेदाः वर्ण्यन्ताम्।

(घ) साहित्यदर्पणस्यालोके रसस्वरूपं व्याख्यायताम्।

2. अधोलिखितेषु यथेच्छं श्लोकचतुष्टयस्य सरलसुरगिरा व्याख्या करणीया। 5×4 = 20

(क) हरत्यघं संप्रति हेतुरैष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्॥

(ख) नवानधोऽधो वृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना॥

(ग) सितं सितिम्ना सुतरां मुनेर्वपु-र्विसारिभिः सौधमिवाथ लम्भयन्।
द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमकोचदच्युतः॥

(घ) महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे।
श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम्॥

(ङ) जगत्यपर्याप्तसहस्रभानुना न यन्नियन्तुं समभावि भानुना।
प्रसह्य तेजोभिरसङ्ख्यतां गतैरदस्त्वया नुन्तमनुत्तमं तमः॥

(च) निदाघधामानमिवाधिदीधितिं मुदा विकासं मुनिमभ्युपेयुषी।
विलोचने बिभ्रदधिश्रितश्रिणी स पुण्डरीकाक्ष इति स्फुटोऽभवत्॥

अथवा

अधोलिखितेषु यथेच्छं विषयचतुष्टयमवलम्ब्य टीका लेखनीया। 5×4 = 20

कार्तस्वरम्, कंसकृषः, रथाङ्गपाणिः, धराधरेन्द्रः, कालत्रितयम्, शितिवासः।

3. अधोलिखितेषु यथेच्छं पञ्चानां प्रश्नानाम् उत्तरं प्रदेयम्। $2\times5 = 10$

(क) का आसीत् तत्रभवती रमा चौधुरी ? क आसीत् तस्याः पत्युः परिचयः ?

(ख) रमाचौधुरीदेव्या प्रणीतं ग्रन्थद्वयम् उल्लेख्यम्।

(ग) कः आसीत् तोतापुरी ?

(घ) रामकृष्णदेवस्य प्रसिद्धम् उक्तिद्वयम् उल्लिख्यताम्।

(ङ) कुत्रासीत् सारदादेव्याः पित्रालयः ? का आसीत् तस्याः जननी ?

(च) रासमणिदेव्याः परिचयः प्रदीयताम्।

(छ) कः आसीत् हृदयः ?

——×——